This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M149 विषय स्तोत्र

नाव. श्रीसूक्त (श्रीविद्यारण्यकृतभाष्यसह)

लेखक/लिपीकार केशव गुर्जरलिखितम्

पृष्ठ 5 काळ शके 1769 पूर्ण/अपूर्ण

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथश्रीसूक्तंभाष्यविद्यारण्यकृतप्रारंभः॥राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्री०भा०॥ श्रीगणेशाय नमः ॥ अथ श्रीसूक्तभाष्यं विद्यारण्यभाष्यतः लिख्यते ॥ हिरण्मवर्णामिति ॥ हे जातवेदः ॥ आ
॥१॥ नमङ्ख अग्ने त्वं हिरण्यवर्णां हिरण्यस्य सुवर्णस्य वर्णः ॥ कांतिरिव हूर्णो यस्यास्तां हरिणीं हरितवर्णां
हरिणीरूपधरां वा ॥ श्रीर्धृत्वा हारिणीरूपमरण्ये संचचारेति पुराणांतरात् ॥ सुवर्णरजतस्रजां ॥ सुव

ॐ ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां ॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १ ॥

र्णस्य पुष्पाणि सुवर्णानि एवं रजतस्य पुष्पाणि तेषां स्रजो माला यस्यास्तां ॥ स्वकस्ताहच यो पुष्पाणीत्यव
गम्यते ॥ चंद्रां चंद्रवत्प्रकाशमानां ॥ तद्रूपेणावस्थितां वा ॥ हिरण्मयीं हिरण्यस्वरूपां ॥ लक्ष्मील
क्षणवतीं ॥ एवंरूपां श्रियं ॥ मे मत्त्वं मदर्थं ॥ आवाह आह्वय ॥ अग्नेर्देवहोतृत्वाद् आह्वानं तदधी ॥५॥
नमिति भावः ॥ १ ॥ ॐ श्रीपांडुरंगाय नमः

तां म इति ॥ हे जातवेदः ॥ अनपगामिनीं ॥ अपगमनरहितां ॥ तां वक्ष्यमाणां लक्ष्मीं मे मह्यं ॥ आवह आह्व
य ॥ यस्यां श्रियां आवाहितायां सत्यां ॥ हिरण्यं सुवर्णं गां धेनुं ॥ अश्वं वाजिनं ॥ पुरुषान् पुत्रादीन् ॥ अहं
विंदेयं ॥ प्राप्नुयां ॥ २ ॥ अश्वपूर्वामिति ॥ अश्वाः पूर्वे पुरोगा यस्यास्तां ॥ रथमध्यां रथो मध्ये यस्यास्तां ॥ हस्ति
नादप्रमोदिनीं ॥ हस्तिनां गजानां नादेन बृंहितेन ॥ प्रबोधिनीं ॥ प्रकर्षेण ज्ञापयित्रीं ॥ श्रियं श्रयणीयां सेनारू

तां म आवह जातवेदो लक्ष्मीमनपगामिनीं ॥ यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहं ॥ २ ॥ अश्वपूर्वां रथ ॥४॥
मध्यां हस्तिनादप्रबोधिनीं ॥ श्रियं देवीमुपह्वये श्रीर्मा देवी जुषतां ॥ ३ ॥ कांसोस्मितां हिरण्यप्रा
कारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं ॥ पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियं ॥ ४ ॥

पां ॥ उपाह्वये समीपं प्रत्याह्वये एतादृशी देवी ॥ श्रीः सा मां जुषतां सेवतां ॥ ३ ॥ कांसोस्मितामिति कां वाङ्मनसयो
रगोचरां दुर्निरूपस्वरूपामित्यर्थः ब्रह्मरूपां वा ॥ सोस्मितां ॥ ईषत् उद्भूतं यत्स्मितं तद्युक्तां ॥ दलोपच्छादसः ॥ हि
रण्यप्राकारां सुवर्णस्य प्राकारो रावर्णो यस्यास्तां ॥ आर्द्रां क्लिन्नां ॥ क्षीरोदधेरुत्पन्नत्वात् ॥ ज्वलंतीं प्रकाशमानां ॥
तृप्तां तर्पयंतीं ॥ भक्तान्मनोरथावित्तिशेषः ॥ पद्मे स्थितां कमले आसीनां ॥ पद्मवर्णां कमलवर्णां कमलतां सितां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्री० भा०॥
॥२॥

श्र

चंद्रामिति॥ अत्राहं ह्रूप्रक्षेपः प्रामादिकः॥ चंद्रां चंद्रवत्प्रकाशमानां प्रभा यस्यास्तां॥ प्रभासां प्रकृष्टाः भाः कांतिर्यस्यास्तां॥ यशसा कीर्त्या ज्वलंतीं प्रकाशमानां देवजुष्टां देवैरिंद्राद्यैः सेवितां प्रीतां वा॥ उदारां वदान्यां॥ पद्मिनीं पद्मलतारूपां॥

चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदारां॥ तां पद्मिनीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे॥ ५॥

ईमिति निपातोनर्थकः॥ अस्य स्थाने ईं ई कारो वाच्यो वा। तां श्रियं॥ शरणं रक्षित्रीं॥ प्रपद्ये प्रपन्नोस्मि॥ अहमिति शेषः॥ अतः हे श्रीः मे मम॥ अलक्ष्मीः॥ अश्रीर्नश्यतां नाशं प्राप्नोतु॥ त्वां वृणे शरणत्वेन स्वीकुर्वे॥ ५॥ ॥२॥

स्य

आदित्येति॥ आदित्यः सूर्यस्य वर्ण इव वर्णो यस्यास्तत्संबोधनं हे श्रीः तव तपसः नियमात्तेतोः वनस्पतिः बिल्वः बिल्वनामको वृक्षः द्रुमः अधिजातः प्रादुर्भूतः लक्ष्म्याः करादिति विशेषः कात्यायन्याः शमी जाता बिल्वो लक्ष्म्याः करे भवदिति वामनपुराणात्॥ अथानंतरं तस्य बिल्वस्य फलानि शालादुकानि॥ तपसा त्वत्तपसा त्वदनुग्र

आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोथ बिल्वः॥ तस्य फलानि तपसा नुदंतु मायांतराया श्च बाह्या अलक्ष्मीः॥ ६ उपैतु मां देवसखः कीर्तिश्च मणिना सह॥ प्रादुर्भूतो सुराष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे॥ ७॥

हेणेत्यर्थः॥ अंतरा॥ माया अविद्या अंतरिंद्रियसंबधिन्यः या श्च बाह्याः बहिरिंद्रियसंबधिन्यः ताः अलक्ष्मीः अश्रियः नुदंतु निवारयंतु॥ ६ उपैतु मामिति॥ हे श्रीः देवसखः देवो महादेवः तस्य सखा कुबेरः॥ कीर्तिः कीर्त्यभिमानिनी दक्षकन्या देवता॥ मणिना कोशाध्यक्षेण॥ मणिभद्रेण सह सार्धं उपैतु उपगच्छतु॥ अहं अस्मिन्राष्ट्रे जनपदे प्रादुर्भूतोस्मि उत्पन्नोस्मि॥ कीर्तिः यशः ऋद्धिं समृद्धिं मे मह्यं ददातु॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्री० भा०॥ क्षुत्पिपासेति॥ अशनात् तस्या मलिनात्मिकां ज्येष्ठां क्षुधां अलक्ष्मीं अश्रियं अहं नाशयामि॥ नाशं प्रापयामि
हे श्रीः त्वं अभूतिं असंपत्तिं तथा सर्वां॥ असमृद्धिं अनभिवृद्धिं मे मम गृहात् निर्णुद निवारय॥ ८॥ गंधद्वारा
॥३॥ मिति॥ गंधो घ्राणग्राह्यो गुणः स द्वारं लक्षणं यस्याः सा तां॥ अमोदविशिष्टां सुगंधिप्रियामित्यर्थः॥ दुराधर्षां के
नापि धर्षयितुमशक्यां॥ नित्यपुष्टां नित्यं सदा सस्याभिः पुष्टां समृद्धां॥ करीषिणीं गवाश्वादिपशुसमृद्धां

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहं॥ अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्॥ ८॥ गं
धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियं॥ ९॥ मनसः
काममाकूतिं वाचः सत्यमशीमहि॥ पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥ १०॥

सर्वभूतानां सर्वप्राणिनां ईश्वरीं अधिष्ठात्रीं॥ आधारभूतां वा॥ तां श्रियं इह उपह्वये गतं॥ ९॥ मनस इति॥ हे श्रीः
मनसः कामं मनोरथं॥ आकूतिं संकल्पसिद्धिं च॥ वाचः वागिंद्रियस्य सत्यं यथार्थं॥ पशूनां गोमहिष्यादीनां रू ॥३॥
पं क्षीरादि॥ अन्नस्य अदनीयस्य यवव्रीह्यादेः रूपं भक्ष्यादि चातुर्विध्यं च॥ अशीमहि लभेमहि॥ श्रीः संपत् यशः की
मयि श्रयतां॥ आश्रयतां॥ १०॥

॥कर्दमेनेति॥ कर्दमाख्येन पुत्रेण प्रकृष्टा जाता अपत्यं यस्याः सा सुपुत्रेत्यर्थः॥ भूता अभवत्॥ अतः कर्दम
॥श्रीपुत्र॥ त्वं मयि मदीयगृहे संभव॥ संवस पद्ममालिनीं कमलमालाधारिणीं तव मातरं जननीं॥ श्रियं मे म
म कुले वासय निवासय॥ ११॥ आपः सृजंत्विति॥ अभिमानिन्यो देवताः॥ स्निग्धानि तत्तत्कार्याणि च सृ

कर्दमेन प्रजाभूता मयि संभव कर्दम॥ श्रियं वासय मे कुले मातरं पद्ममालिनीं॥ ११॥
आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे॥ नि च देवीं मातरं श्रियं वासय मे कुले॥ १२॥
आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीं॥ चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥ १३॥

जंतु॥ हे चिक्लीताख्य॥ श्रीपुत्र मे मम गृहे वस निवस॥ देवीं मातरं श्रियं मे मम कुले निवासय संवासय॥ १२॥
आर्द्रां पुष्करिणीमिति॥ आर्द्रां गतं॥ अभिषेकार्थोक्तिदिग्गजशुंडाग्रोद्धृतकुंभजलार्द्रां पुष्प्यभिमानिनीं पिंग
लां पिंगलवर्णां पद्ममालिनीमित्यादि सिद्धमन्यत्॥ १३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्री०भा०॥ आर्द्रां यष्करिणीमिति ॥ आर्द्रांगतां यष्करिणीं यष्टिकरां वेत्रहस्तामित्यर्थः ॥ टिलोपश्छांदसः ॥ दंडरूपां वा ॥ कव
र्णां शोभनवर्णां हेममालिनीं हेमविकृतमणिशृंखलादिमालावतीं ॥ सूर्यां सूर्यवत्प्रकाशमानां ॥ सिद्ध
॥४॥ मन्यत् ॥१४॥ तां म आवहेति ॥ इयमृक् द्वितीययार्चा व्याख्याता ॥ प्रभूतं भूयिष्ठं गावः गाः ॥ दास्यः परिचा

तां म आवह जातवेदो लक्ष्मीमनपगामिनीं ॥ यस्यां हिरण्यं प्रभूतं गावो दास्यो
श्वान्विंदेयं पुरुषानहं ॥१५॥ इति श्रीसूक्तभाष्यः समाप्तः ॥ छ

टीका: अस्य सूक्तस्य स्वरनियमो वैयाकरणवैदिकशिष्टसंप्रदायाद्बोध्यः ॥ १५ ॥ श्रीसूक्तस्य पंचदशा
र्चस्य मंत्रस्य श्रियः पुत्राः आनंदकर्दमचिक्लीता ऋषयः अनुष्टुप् छंदः ॥ चतुर्थी प्रस्तारपंक्तिः ॥ तदुपरि त्रिष्टु
भौ अंते उपरिष्टाद्बृहती ॥ श्रीर्देवता इष्टार्थे विनियोगः ॥ स्तोत्र या चंडी मधुकैटभादिदैत्यदलिनी या माहिषोन्मू ॥५॥
लिनी या धूम्रेक्षणचंडमुंडमथिनी या रक्तबीजाशनी ॥ शक्तिः शुंभनिशुंभदैत्यदलिनी या सिद्धलक्ष्मीः प

॥श्री०भा०॥ रा सा देवी नवकोटिमूर्तिसहिता मां पातु विश्वेश्वरी ॥ १ ॥ शके १७६९ प्लवंगनामसंवत्सरे भाद्रपदशुक्ल १ समाप्तः
॥५॥ गुर्जरोपनामक केशवेन लिखितं ॥ श्रीपंढरीनाथार्पणमस्तु ॥ शुभं भवतु ॥ छ छ छ ५

हिरण्यवर्णामिति पंचदशर्चस्य सूक्तस्य ॥ आनंदकर्दमचिक्लीतेंदिरासुता ऋ
षयः ॥ अनुष्टुप् छंदः ॥ चतुर्थी बृहती पंचमी षष्ठ्यौ त्रिष्टुभौ ॥ अंत्या प्रस्ता
रपंक्तिः सर्वमंत्राणां ॥ श्रीरग्निश्च देवता ॥ व्यंजनानि बीजानि ॥ स्वराः
शक्तयः ॥ ममाभीष्टमनोरथसिद्ध्यर्थे जपे विनियोगः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(61)

इति श्रीसूक्तं विद्यारण्यकृतं समाप्तं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.08.19 16:24
,TRANSFERRED=2019/08/05 at 16:29:21
,PAGES=7
,TYPE=STD
,NAME=S0001317
,Book Name=M-149-SHRISUKT VIDHARVYBHASHY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection